# kRikArAdi shrI kRiShNAShTottarashatanAmastotram

# કૃકારાદિ શ્રીકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : kRikArAdi kRiShNAShTottarashatanAmastotram

File name : kRikArAdikRiShNa108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# કૃકારાદિ શ્રીકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।

હરિઃ ૐ

કૃષ્ણઃ કૃતી કૃપાશીતઃ કૃતજ્ઞઃ કૃષ્ણમૂર્ધજઃ ।
કૃષ્ણાવ્યસનસંહર્તા કૃષ્ણામ્બુધરવિગ્રહઃ ॥ ૧॥

કૃષ્ણાબ્જવદનઃ કૃષ્ણાપ્રકૃત્યઙ્ગઃ કૃતાખિલઃ ।
કૃતગીતઃ કૃષ્ણગીતઃ કૃષ્ણગોપીજનામ્બરઃ ॥ ૨॥

કૃષ્ણસ્વરઃ કૃત્તજિષ્ણુગર્વઃ કૃષ્ણોત્તરસ્રજઃ ।
કૃતલોકેશસમ્મોહઃ કૃતદાવાગ્નિપારણઃ ॥ ૩॥

કૃષ્ટોલૂખલનિર્ભિન્ન યમલાર્જુનભૂરુહઃ ।
કૃતગોવર્ધનચ્છત્રો કૃતાહિફણતાણ્ડવઃ ॥ ૪॥

કૃત્તાઘઃ કૃત્તભક્તાઘઃ કૃતદૈવતમઙ્ગલઃ ।
કૃતાન્તસદનાધીતગુરુપુત્રઃ કૃતસ્મિતઃ ॥ ૫॥

કૃતાન્તભગિનીવારિવિહારી કૃતવિત્પ્રિયઃ ।
કૃતગોવત્સસન્ત્રાણઃ કૃતકેતરસૌહૃદઃ ॥ ૬॥

કૃત્તભૂમિભરઃ કૃષ્ણબન્ધુઃ કૃષ્ણમહાગુરુઃ ।
કૃષ્ણપ્રિયઃ કૃષ્ણસખઃ કૃષ્ણેશઃ કૃષ્ણસારથિઃ ॥ ૭॥

કૃતરાજોત્સવઃ કૃષ્ણગોપીજનમનોધનઃ ।
કૃષ્ણગોપીકટાક્ષાલિ પૂજિતેન્દીવરાકૃતિઃ ॥ ૮॥

કૃષ્ણપ્રતાપઃ કૃષ્ણાપ્તઃ કૃષ્ણમાનાભિરક્ષણઃ ।
કૃપીટધિકૃતાવાસઃ કૃપીટરુહલોચનઃ ॥ ૯॥

કૃશાનુવદનાધીશઃ કૃશાનુહુતખાણ્ડવઃ ।
કૃત્તિવાસસ્સ્મયાહર્તા કૃત્તિવાસોજ્જ્વરાર્દનઃ ॥ ૧૦॥

કૃત્તબાણભુજાવૃન્દઃ કૃતવૃન્દારકાવનઃ ।
કૃતાદિયુગસંસ્થાકૃત્કૃતસદ્ધર્મપાલનઃ ॥ ૧૧॥

કૃતચિત્તજનપ્રાણઃ કૃતકન્દર્પવિગ્રહઃ ।
કૃશોદરીવૃન્દબન્દીમોચકઃ કૃપણાવનઃ ॥ ૧૨॥

કૃત્સ્નવિત્કૃત્સ્નદુર્જ્ઞેયમહિમા કૃત્સ્નપાલકઃ ।
કૃત્સ્નાન્તરઃ કૃત્સ્નયન્તા કૃત્સ્નહા કૃત્સ્નધારયઃ ॥ ૧૩॥

કૃત્સ્નાકૃતિઃ કૃત્સ્નદૃષ્ટિઃ કૃચ્છ્લભ્યઃ કૃતાદ્ભુતઃ ।
કૃત્સ્નપ્રિયઃ કૃત્સ્નહીનઃ કૃત્સ્નાત્મા કૃત્સ્નભાસકઃ ॥ ૧૪॥

કૃત્તિકાનન્તરોદ્ભૂતઃ કૃત્તરુક્મિકચવ્રજઃ ।
કૃપાત્તરુક્મિણીકાન્તઃ કૃતધર્મક્રિયાવનઃ ॥ ૧૫॥

કૃષ્ણપક્ષાષ્ટમીચન્દ્ર કૃાલભાગમનોહરઃ ।
કૃત્યસાક્ષી કૃત્યપતિઃ કૃત્સ્નક્રતુ ફલપ્રદઃ ॥ ૧૬॥

કૃષ્ણવર્મલસચ્ચક્રઃ કૃપીટજવિભૂષણઃ ।
કૃતાખ્યારૂપનિર્વાહઃ કૃતાર્થીકૃતબાડબઃ ॥ ૧૭॥

કૃતવન્યસ્રજાભૂષઃ કૃપીટજલસત્કરઃ ।
કૃપીટજાલયાવક્ષાઃ કૃતપાદાર્ચનામ્બુજઃ ॥ ૧૮॥

કૃતિમેતરસૌન્દર્યઃ કૃતિમાશયદુર્લભઃ ।
કૃતતાર્ક્ષ્યધ્વજરધઃ કૃતમોક્ષાભિધેયકઃ ॥ ૧૯॥

કૃતીકૃતદ્વાપરકઃ કૃતસૌભાગ્યભૂતલઃ ।
કૃતલોકત્રયાનન્દઃ કૃતીકૃતકલિપ્રધઃ ॥ ૨૦॥

કૃતોત્તરાગર્ભરક્ષઃ કૃતધી કૃતલક્ષણઃ ।
કૃતત્રિજગતીમોહઃ કૃતદેવદ્રુમાહૃતિઃ ॥ ૨૧॥

કૃત્સ્નાનન્દઃ કૃત્સ્નદુઃખદૂરઃ કૃત્સ્નવિલક્ષણઃ ।
કૃત્સ્નાંશઃ કૃત્સ્નજીવાંશઃ કૃત્સ્નસત્તઃ કૃતિપ્રિયઃ ॥ ૨૨॥

॥ ઇતિ શ્રી કૃકારાદિ કૃષ્ણાષ્ટોત્તરશતમ્ વિશ્વાવસુ
શ્રાવણા બહુલ ચતુર્થી સ્થિરવાસરે રામેણ લિખિતં
સમર્પિતં ચ શ્રી હયગ્રીવાય ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

*kRikArAdi shrI kRiShNAShTottarashatanAmastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*